ISSN – 2349-3100 Peer Reviewed

Vol. II , Aug – 2014 Refereed Journal

अन्ताराष्ट्रिय-मूल्यांकित-त्रैमासिक-सन्दर्भित-शोधपत्रिका

वेदज्योतिष्मती

Vedajyotishmati

संरक्षकाः

प्रो. रामचन्द्रझाः, प्रो. रामदेवझाः,

प्रो. देवेन्द्रमिश्रः, प्रो. शिवाकान्तझाः

प्रधानसम्पादकः

प्रो. हंसधरझाः

आचार्यः, ज्योतिषविभागः, राष्ट्रियसंस्कृतसंस्थानम्

भोपालपरिसरः।

सम्पादकः

डॉ. आशीषकुमारचौधरी

असिस्टेंट-प्रोफेसर, ज्योतिषविभागः,

क.जे.सोमैया संस्कृतविद्यापीठम्, मुम्बई।

प्रकाशकः

राष्ट्रिय-संस्कृत-अनुसंधान-संस्थानम्, के. एम. टैंक लहेरियासरायः, दरभंगा

सम्पादकमण्डल

1 प्रो .बोधकुमार झा,
आचार्य, व्याकरण-विभाग,
क. जे. सोमैया-संस्कृतविद्यापीठ, मुम्बई ।

2 प्रो. हंसधर झा,
ज्योतिष विभाग ,आचार्य,
राष्ट्रिय संस्कृत संस्थान , भोपाल परिसर, भोपाल।

3 प्रो. प्रमोदवर्धन कौण्डिल्यायन,
विभागाध्यक्ष, मीमांसा दर्शन विभाग नेपाल,
नेपाल संस्कृत विश्वविद्यालय, काठमाण्डु, नेपाल ।

4 जूही जेनोजे,
आचार्या,दर्शन विभाग,
कोरिया विश्वविद्यालय, सीओल, कोरिया ।

5 डॉ. प्रवेश सक्सेना,
पूर्व आचार्या,संस्कृत विभाग,
जाँकिर हुसैन महाविद्यालय
दिल्ली विश्वविद्यालय।

6 डॉ. धनञ्जय मणि त्रिपाठी,
आचार्य ,संस्कृत विभाग,
मोदी विश्वविद्यालय, राजस्थान ।

7 डॉ. दिलीपकुमार झा,
विभागाध्यक्ष-धर्मशास्त्र विभाग
कामेश्वर सिंह संस्कृत विश्वविद्यालय, दरभंगा ।

8 डॉ. राजीव मिश्र,
प्राचार्य, सन्तनागपाल संस्कृतमहाविद्यालय,
एवं शोध संस्थान, सम्पूर्णानन्द संस्कृत
विश्वविद्यालय, नई दिल्ली।

9 टेल्टो डेल्टेज,
आचार्य दर्शन एवं संस्कृति विभाग,
हेल्डमार्ग विश्वविद्यालय,हेल्डनवर्ग, जर्मनी।

10 प्रो. विद्यानन्द झा,
साहित्यविभागाध्यक्ष,
भोपाल परिसर, भोपाल।

पुनर्वीक्षणमण्डल

1. आचार्य रामदेव झा,
पूर्व आचार्य ज्योतिष विभाग,
लालबहादुर शास्त्री, राष्ट्रिय संस्कृत विद्यापीठ, दिल्ली ।

2. आचार्य नीलाम्बर चौधरी,
आचार्य रामभगत राजीवगाँधी महाविद्यालय दरभंगा ।

3 आचार्या प्रवेश सक्सेना,
आचार्या ,जाँकिर हुसैन महाविद्यालय
दिल्ली विश्वविद्यालय,दिल्ली।

प्रबंधक संपादक

1. श्री पंकज ठाकुर एवं अध्यक्ष
रा.सं.अनु. संस्थान, दरभंगा।

सलाहकार संपादक

1. डॉ. रंजय कुमार सिंह
रा. सं. संस्थान, मुम्बई ।

सह –संपादिका एवं सह –संपादिकश्च

1 **डॉ गीता दूबे** , रा. सं. संस्थान, मुम्बई ।
2. **डॉ मनीष कुमार चौधरी** ,अध्या.सं.दरभंगा ।
संगणक सहायक -नितीश भारद्वाज ।

@copy right – Rashtriya Sanskrit Anusandan Sansthan

Email – rsas.kothram@gmail.com, vjvv.rs@gmail.com,
Ph No. 06272-224671, 09619269812, 07506137027 अंक – अगस्त 2014

पत्रिका में प्रकाशित लेखों से प्रकाशक का सहमत होना अनिवार्य नहीं है। विवाद का समाधान दरभंगा न्यायालय से ही स्वीकार्य है। लेखों को परिवर्तित, स्वीकृत एवं अस्वीकृत करने का पूरा अधिकार प्रकाशक को होगा ।A trilingual Educational Sanskrit Research Journal Published by the Rashtriya Sanskrit Anusandhan Sansthan, Darbhanga

प्रो.मदनमोहन पाठक
प्राप्तस्वर्णपदक
आचार्य एवं अध्यक्ष, ज्यौतिष विभाग
सम्पादक-श्रीजगन्नाथपञ्चांगम्
एवं भास्करोदयः
राष्ट्रिय संस्कृत संस्थान
लखनऊपरिसर,विशालखण्ड-4
गोमती नगर, लखनऊ, उ.प्र।

Prof. Madan Mohan Pathak
Goldmedalist
Professor and Head, Dept.oJyotish
Editor –Sri jagannath panchangam
Bhaskaroday (jyoti.)
RASHTRIYA SANSKRIT SANSTHAN
LUCKNOW CAMPUS, VISHALKHAND-4
GOMTI NAGAR, LUCKNOW,U. P

शुभाशंसनम्

"नक्षत्रताराग्रहसङ्कुलापि ज्योतिष्मती चान्द्रमसीव रात्रि " रिव **"वेदज्योतिष्मती"** नामिका संस्कृतवाङ्मयस्य निखिलज्ञानविज्ञानपथप्रदर्शिका सरला सुबोधा त्रिपथगा (**संस्कृत-हिन्दी-आँग्लभाषीया**) विश्वमनोज्ञा। इयं पत्रिका संस्कृतजगतः विकासाय अजस्त्रमग्रेसरा वर्तते। अत्र न केवलं भारतीयसंस्कृतविदुषां लेखो दृष्टः, अपितु भारताद्बहिःस्थानां संस्कृतविदुषामपि दृष्टा नैके लेखाः। अनेन सत्प्रयासेन वेद-वेदाङ्गानां न केवलं भारतवर्षे प्रचारः प्रसारो भविष्यति, अपितु भारताद्बहिरपि संस्कृतसाहित्यं प्रति जनाः आकृष्टाः भविष्यन्ति। अनेन सत्प्रयासेन विश्वबन्धुत्वभावनायाः विकासोऽपि भविष्यति। अस्माकं वेदोऽपि निर्दिशति –

"संगच्छध्वं संवदध्वं सं वो मनांसि जानताम्।

देवा भागं यथा पूर्वे सञ्जानाना उपासते ।।"

अवसरेऽस्मिन् अस्य सारस्वतयज्ञकर्मणः सम्पादकाः विद्याविनयसम्पन्नाः स्वनामधन्याः **आशीषकुमारचौधरीमहाशयाः** विशेषेण सन्ति अभिनन्दनीयाः। सम्पादनकर्मणि महोदयस्यास्य श्रद्धोपेतः श्रमः सफलो भूयात्। जायताञ्च पत्रिकेयं जगन्मङ्गलायेति शम्।

आचार्यमदनमोहनपाठकः

सम्पादकीयम्

नाविदितं सुरभारतीसमुपासकैः सुधीभिर्यत् सुरगीर्यथैव प्राचीनतमा तथैव नवनवोन्मेषशालितया नूतनतमापि। अत्र विद्यमानमलौकिकज्ञानगङ्गाप्रवाहं विलोक्य को नाम सहृदयो लोकोत्तराह्लादं न विन्दते। ज्ञानगङ्गाप्रवाहोऽसावनादिकालादेव वेदपुराणधर्मशास्त्रदर्शनादिग्रन्थमाध्यमेन, विविधमनीषिणां ग्रन्थपत्रिकादिमाध्यमेन चानवरतं लोकं पावयन् वरीवर्ति। तस्मिन्नेव क्रमे देशदेशान्तर्गतानां विविधविदुषां संस्कृत-हिन्दी-आङ्ग्लभाषोपनिबद्धैर्ज्ञानविज्ञानमयैश्शोधलेखैश्शोभमाना वेदज्योतिष्मतीतिनामधेया त्रैमासिकी शोधपत्रिका लोकमाह्लादयन्ती प्राकाश्यमेतीति मोदते मे मनः। तत्रापि ऐषमो वेदज्योतिष्मत्या **द्वितीयमप्यङ्कप्रसूनं** पाठकानां हस्ते सादरं समर्प्यत इति महान् सन्तोषः। आशासेऽङ्कोऽयं द्वितीयोऽपि शोधच्छात्रोपकारी, पाठकानां स्वान्ताह्लादकारी स्यात्। यतः पाठकानां तोष एव कस्यापि ग्रन्थस्य पत्रिकाया वा साफल्यं जनयति।

पत्रिकाया अस्याः प्रकाशने मुख्यकारणभूतोऽस्ति परमजिज्ञासुः युवपण्डितः **डॉ. आशीषकुमारचौधरीमहोदयः**।राष्ट्रियसंस्कृतसंस्थानस्य सोमैयापरिसरे अध्यापयन्नप्यसौ पत्रिकाया अस्याः सम्पादनदायित्त्वं प्रामुख्येन सोत्साहं निर्वहति। एतदर्थं श्रीचौधरीमहोदयाय हृदयेनाशेषमाशीर्वादसहितं धन्यवादं प्रयच्छामि। अस्मिन्नेव क्रमे साभिनन्दनं साधुवादं समर्पयामि तेषां समेषां विद्वन्निकराणां प्राध्यापकानां शोधच्छात्राणां कृतेऽपि येषां सार्थकश्रमोद्भूतैश्शोधपत्रैः पत्रिकेयं गौरवाय कल्पते। क्रमेऽस्मिन् ते सर्वेऽपि अक्षरसंयोजकादिसहयोगिनः पत्रिकाप्रकाशनाधिकारिणश्चाभिनन्दनीयाः साधुवादार्हाश्च येषाममूल्यं योगदानं वेदज्योतिष्मतीपत्रिकाप्रकाशनरूपज्ञानयज्ञे सम्प्राप्तम्। अन्ते च कामये भगवन्तं महाकालं यदेवमेव ज्ञानविज्ञानोद्भासकसारगर्भितविपश्चिल्लेखरञ्जिता पत्रिकेयं प्राकाश्यमधिगच्छन्ती अशेषकालं यावल्लोकानुरञ्जिनी स्यादिति शम्।

वेदज्योतिष्मतीनाम्नी पत्रिका बुधपोषिता।
भासतां हि चिरं लोके ज्ञानविज्ञानगुम्फिता।।

गुणैकपक्षपातिनां सहृदयानां विदुषां शुभाशंसनमपेक्षमाणः-

(प्रो. हंसधर झाः)
प्रधानसम्पादकः

 ISSN – 2349-3100

✍ एक नई पहल- सम्पादक

वेदज्योतिष्मती के नियमित पाठकों , बुद्धिजीवियों एवं भारतीय दर्शन के प्रति आस्थावान् जागरूक सामाजिकों की निरन्तर माँग का आदर करते हुए यह विज्ञापित किया जाता है कि वेदज्योतिष्मती एक विशेष दार्शनिक स्तम्भ का श्रीगणेश करने जा रही है, जो इस अङ्क से पाठकों के लिए उपलब्ध होगा । इस स्तम्भ में वेदान्तदर्शन के एक – एक सूत्र का प्रामाणिक विवेचन करने का संकल्प है ।इस स्तम्भ के लेखक प्रो. बोधकुमार झा हैं ।उनके प्रति हम अपनी कृतज्ञता ज्ञापित करते हैं ।

भारतीय दर्शन की कई विचारधाराएँ हैं । उनको मुख्यरूप से दो वर्गों में विभक्त किया जाता है – आस्तिक और नास्तिक । इनमें चार्वाक , बौद्ध , जैन , न्याय , वैशेषिक , सांख्य , योग , मीमांसा और अन्त में वेदान्त दर्शन का स्थान आता है । वेदान्त दर्शन को उपनिषद् दर्शन भी कहते हैं । इस दर्शन के तीन मान्य ग्रन्थ हैं – उपनिषद् , ब्रह्मसूत्र और गीता । इन्हें प्रस्थानत्रयी कहा जाता है । महर्षि वेदव्यास ने उपनिषद् में वर्णित ज्ञानतत्त्वों को संक्षिप्त और सार रूप में प्रस्तुत करने के लिए सूत्रों को लिखा । जिनमें परब्रह्म के स्वरूप का साङ्गोपाङ्ग निरूपण होने से उनका नाम ब्रह्मसूत्र पडा । इनमें वेद के अन्त अर्थात् अन्तिम ज्ञानकाण्ड का निचोड होने के कारण इन्हें वेदान्तसूत्र भी कहतें हैं । इन सूत्रों की व्याख्या अनेक आचार्यों ने की , जिनमें पर्याप्त मतभेद हैं । फलतः वेदान्त में अनेकों वाद आ गये , जिनमें अद्वैत , विशिष्टाद्वैत , द्वैत , द्वैताद्वैत , शुद्धाद्वैत प्रमुख हैं । इन वादों में शंकराचार्य का अद्वैतवाद सर्वाधिक आदरणीय है । इस दार्शनिक निबन्ध में आचार्य शंकर के भाष्य को ही मूल आधार मानकर विवेचन किया जाना है ।

दर्शन के मौलिक प्रश्न हैं – हम कौन हैं ? कहाँ से आये हैं ? दिखाई देने वाला संसार क्या है ? इसकी उत्पत्ति कहाँ से हुई ? इससे हमारा क्या सम्बन्ध है ? यह चेतन है या अचेतन ? जीवन का उद्देश्य क्या है ? इसकी सिद्धि का कौन सा मार्ग है ? इस तरह के प्रश्नों का हल ब्रह्मसूत्र के आधार पर दार्शनिक स्तम्भ में ढूँढने की कोशिश होगी । आशा है , पाठकवर्ग की कसौटी पर यह स्तम्भ खरा उतरेगा ।

विषयसूची पृष्ठसंख्या

* सम्पादकीयम्	प्रो.हंसधरझाः	4
* एक नई पहल	सम्पादक	5
* दार्शनिक स्तम्भ -अथातो ब्रह्मजिज्ञासा	प्रो. बोधकुमार झा	7
* संस्कृतम्, सामाजिकी सद्भावना च	डॉ. दिलीपकुमारझाः	8
* वर्तुलाकाराया धरायाः समत्वदर्शने सैद्धान्तिकं चिन्तनम्	प्रो.हंसधरझाः	11
* वेदेषु ग्रहणविमर्शः	डॉ. अशोकथपलियालः	14
* कारकविवेचनम्	डॉ. धनुर्धरझाः	18
* पश्य मृगो धावतीत्यत्र शाब्दबोधोपपत्तिः	मौनिका बोल्ला	21
* केन्द्राधिपत्यदोष : गुरु और शुक्र के सन्दर्भ में	डॉ. राजीवरंजन	24
* रसेभ्यो भावानामभिनिर्वृत्तिरुताहो भावेभ्यो रसानामिति	डॉ .मोहिनी अरोरा	27
* वेदों में तिथियों की वैज्ञानिक अवधारणा	डॉ. आशीष कुमार चौधरी	30
* पशु-पक्षियों पर आधारित यात्राकालीन शकुन मीमांसा	डॉ.सुनयनाभाटी	34
* रामचरितमानस में नीतितत्त्व	डॉ.(श्रीमती) गीतादूबे	39
* भारत की प्राचीन सामाजिक व्यवस्था	डॉ. रंजयकुमारसिंह	43
* **Contribution of India to the World sadhana gayatri mantras**	**Juhe jehoge**	**48**
* **An Overview on Reference Service on Web Environment**	**Rautmale Anand S**	**51**

दार्शनिक स्तम्भ

अथातो ब्रह्मजिज्ञासा(ब्रह्मसूत्र. 1/1/1)

✍प्रो .बोधकुमार झा

(शब्दार्थ – अथ = इसके बाद , अतः= इसलिए , ब्रह्मजिज्ञासा = ब्रह्म के विषय में ज्ञान की इच्छा , करनी चाहिये ।)

मैं दुबला हूँ,मैं गोरा हूँ,मैं बैठता हूँ –ऐसा व्यवहार होता है । इन वाक्यों में देह को "मैं" कहा जाता है ।मैं अन्धा,बहरा हूँ –इनमें इन्द्रिय को मैं कहा जाता है ।मैं सुखी हूँ ,दुःखी हूँ – इन प्रयोगों में मन को मैं शब्द का अर्थ माना जाता है । पुत्र,भार्या आदि दुःखी है , तो कहते हैं कि मैं दुःखी हूँ । यहाँ मैं का अर्थ पुत्र,भार्या आदि हैं ।मैं शुद्ध,बुद्ध,आनन्द हूँ –इनमें मैं का अर्थ आत्मा है । इस तरह शरीर, इन्द्रिय, मन, पुत्र पत्नी, आत्मा-इन सभी के लिए मैं शब्द का व्यवहार देखा जाता है। क्या, ये सारे अर्थ सही हैं ? सत्य तो एक होता है। इसलिए सभी को सत्य नहीं माना जा सकता । तो फिर ऐसा व्यवहार क्यों होता है ? जब से ब्रह्माण्ड है,मैं के ये सारे अर्थ मान्य हैं।वेदान्त दर्शन कहता है – मैं का अर्थ आत्मा, सिर्फ आत्मा है । आत्मा में शरीर आदि का अध्यास होता है । जिसके कारण जीव शरीर आदि को ही मैं मान बैठता है । अयथार्थ को यथार्थ समझ लेता है । अध्यास अर्थात् मिथ्याज्ञान । जिसे अविद्या या अज्ञान या भ्रम भी कहा जाता है । यह अध्यास अनादि है अर्थात् इसका आदि नहीं है । यह अनन्त है अर्थात् इसका अन्त नहीं है । सच में जो है नहीं , जीव उसे मैं मानकर व्यवहार करता है । जब शास्त्र से सङ्गति होती है । स्वाध्याय से , चिन्तन से आत्मा में होने वाले अध्यास का पता चलता है । तब जीव समझता है कि सभी अनर्थों का बीज अविद्या है । मैं तो शुद्ध . बुद्ध , मुक्त , आनन्दमय आत्मा हूँ । मैं ही ब्रह्म हूँ । जीव और ब्रह्म में भेद तो है ही नहीं । अविद्या के कारण मैंने अनर्थ को अर्थ समझ रखा था । इसी अनर्थ के त्याग के लिए और आत्मा – ब्रह्म के ऐक्य ज्ञान के लिए वेदान्त दर्शन का आरम्भ होता है । समस्त दुःखों से निवृत्ति आत्मज्ञान से होती है । यह आत्मज्ञान या ब्रह्मज्ञान सबको प्राप्त रहता है । किन्तु अविद्या के कारण वह अप्राप्त जैसा होता है । जैसे गर्दन में माला है , किन्तु भ्रमवश व्यक्ति उसे ढूँढता रहता है । परेशान होता है । यह बात कोई दूसरा बताता है कि माला तो तेरी गर्दन में ही है । ऐसा सुनकर देखकर वह व्यक्ति ऐसा खुश होता है , जैसे कि कोई नई वस्तु जो उसके पास नहीं थी , वह मिल गयी हो । वेदान्त दर्शन का यही काम है । वह जीव को उसी के तत्त्वज्ञान को उसे बता देता है । उपर्युक्त ब्रह्मसूत्र हमें ब्रह्म के विषय में जिज्ञासा करने को कहता है । परन्तु जिज्ञासा तभी होती है , जब कि कोई प्रयोजन सिद्ध होना हो और मन में कोई संशय हो । ब्रह्मज्ञान का प्रयोजन निःश्रेयस है । निःश्रेयस अर्थात् मुक्ति । हर व्यक्ति दुःखों से अपनी मुक्ति चाहता है । वह ब्रह्मज्ञान से ही सम्भव है । वह ब्रह्म कोई और नहीं , स्वयं आत्मा है । आत्मा का ज्ञान होते ही मुक्ति स्वतः प्राप्त होती है । किन्तु आत्मा के बारे में बहुत भ्रान्तियाँ हैं । अनेक मान्यताएँ हैं । चैतन्य युक्त शरीर , चेतन इन्द्रिय , मन , विज्ञान , शून्य , कर्त्ता , भोक्ता , ईश्वर आदि को आत्मा मानने वाले बहुत हैं । अतः वस्तुतः आत्मा क्या है ? इसकी जिज्ञासा अवश्य करनी चाहिये । जिज्ञासा से ही सच्चा ज्ञान सम्भव है । सच्चे ज्ञान से ही परम पुरुषार्थ (प्रयोजन) निःश्रेयस की सिद्धि होगी । यही प्रथम ब्रह्मसूत्र का आशय है ।

सभी अनर्थों का बीज अविद्या है ।

आचार्य, व्याकरण-विभाग, क. जे. सोमैया-संस्कृतविद्यापीठ, मुम्बई

संस्कृतम्, सामाजिकी सद्भावना च

✍ डॉ. दिलीपकुमारझाः

ऋषीणामाद्यानां गहनमननावाप्तसुयशाः
श्रुतीनां शास्त्राणां निखिलगुणतत्त्वार्थनिलया।
पुरातत्त्वाधारा सकलभवज्ञानाब्धिविभवा
जयेद् दैवी वाणी त्रिभुवनमनोज्ञा बुधप्रिया ।।[1]

परिष्कृतं, परिशुद्धं, व्याकरणादिदोषरहितं यत् तत् संस्कृतम् । प्राचीनैः ऋषिभिर्मुनिभिश्च भाषागतदोषपरिष्कारेण, अपशब्दादिदोषवारणेन या परिष्कृता भाषा व्यवहृतिमानीता सैव संस्कृतभाषा – नाम्ना सम्बोध्यते, प्रशस्यते, आद्रियते च । 'विद्वांसो हि देवाः' ।विद्वज्जनव्यवहृता चेयं भाषा । देवभाषा, देववाणी, गीर्वाणवाणी, गीर्वाणगीरित्यादिभिर्नामधेयैः व्यवह्रियते । इयमेव भाषा प्राकृतभाषापदमुपगतवती । सेयं भाषा भारतीयानां सामाजिकसद्भावनायाःकृते प्राणरूपिणी, जीवनोन्नायिका, सत्पथप्रदर्शिनी, आचारविचारप्रवर्तिनी, कर्तव्याकर्तव्यबोधिनी, लोकद्वयहितसम्पादिनी च ।

भारतवर्षस्य समस्तमपि प्राचीनं वाङ्मयं संस्कृतभाषामाश्रित्यैवावतिष्ठते । निखिलमपि वैदिकं वाङ्मयं, रामायणं, महाभारतं. पुराणानि, स्मृतिग्रन्थाः, दर्शनानि, धर्मग्रन्थाः, महाकाव्यानि, काव्यानि, नाटकानि, गद्यकाव्यानि, गीतिकाव्यानि, आख्यानसाहित्यम्, नीतिग्रन्थादयश्च संस्कृतभाषायामेवोपलभ्यन्ते । न केवलमेतदेव, व्याकरणं, काव्यशास्त्रं, गणितं, ज्योतिषम्, आचारशास्त्रं, काव्यशास्त्रं, आयुर्वेदः, धनुर्वेदः, वास्तुकलाशास्त्रम्, अर्थशास्त्रम्, राजनीतिशास्त्रम्, ऐतिह्यम्, छन्दःशास्त्रम्, कोशग्रन्थाश्च संस्कृतभाषाया गौरवमभिवर्धयन्ते । समाजस्य सद्भावनायाः तद्ज्ञानस्य विज्ञानस्य न तादृशं किमप्यङ्गम्, यन्नैवोपलभ्यते संस्कृतभाषायाम् । प्राचीनानाम् ऋषीणां, महर्षीणां, कवीनां, तत्त्वज्ञानाम् अनारतश्रमस्यैव फलमेतद् यदीदृशं विपुलं संस्कृतवाङ्मयं दृष्टिपथमुपयाति ।

प्राचीनभारतीयसाहित्यानुशीलनेन स्फुटमेतदवगम्यते यद् ईसवीयसंवत्सरात् पूर्वं गीर्वाणगीरियं जनसाधारणे व्यवहृताऽभूत् । न केवलं विद्वज्जनव्यवहृतभाषारूपेणैवेयं प्रायुज्यत, अपितु लौकिकानामपि व्यवहारास्पदमभूत् । निरूक्तकारो यास्कः संस्कृतभाषा (व्यवहारभाषा) इति निरूपयति । पाणिनिकृतसूत्राण्यपि एतदेव समर्थयन्ते । यथा-दूराह्वाने प्लुतत्वम्, प्रत्यभिवादे अन्तिमस्वरप्लुतत्वं च । पाणिनिना वैदिकलौकिकभाषयोः विभेदो छन्दस्-भाषा-शब्दयोः प्रयोगेण विधीयते । एतेन व्यवहृतभाषारुपेण संस्कृतस्य प्रयोगो लक्ष्यते ।रामायणकाले, महाभारतकाले च संस्कृतभाषैव लोकव्यवहृतिभाषा ऽभूदिति पाश्चात्त्यैरपि निर्विवादम् उररीक्रियते । हनुमान् अशोकवाटिकायां सीतां प्राप्य संस्कृतम् आश्रित्यैव विवक्षति –'वाचं चोदाहरिष्यामि मानुषीमिह संस्कृताम्'।[2] बौद्धकविरश्वघोषः प्राकृतभाषां परित्यज्य बुद्धचरितसौन्दरानन्दकाव्यद्वयं संस्कृतभाषायामेव निरमिमीत । द्वितीयशताब्द्या आरभ्य एकोनविंशतितमशताब्दीं यावत् सर्वेऽपि शिलालेखाः प्रायेण संस्कृत भाषाश्रया एव । राज्ञो भोजस्य काले संस्कृतस्य प्रचुरः प्रचारो लेकविदित एव । कविर्बिल्हणः कश्मीरदेशजनारीणां संस्कृतभाषाज्ञानं तत्प्रयोगं च प्रमाणयति ।मैकडानल – कीथ – विण्टरनित्स – पाल – डायसन – विण्डिश – हर्टलप्रभृतयः पाश्चात्त्यविद्वांसोऽपि न केवलं पुराकाल एव, अपितु अद्यावधि संस्कृतभाषायाः सजीवत्वम्, व्यवहृतित्वं च साधयन्ति ।

समाजे संस्कृतस्यावनदानम् तन्महत्वं न केवलं भारतीयैरेव अपितु पाश्चात्त्यैरपि साह्लादमङ्गीक्रियते। विश्वस्य प्राचीनतनं साहित्यमत्रैवोपलभ्यते । विश्वस्य प्राचीनतमायाः संस्कृतेः सभ्यतायाश्च यथार्थावगमाय संस्कृतमेवैकं साधनम् । विश्वसंस्कृतेराधारशिला संस्कृतवाङ्मये एव प्राप्यते । तन्मूलकमेव संस्कृते ज्ञानविज्ञान-कला-संस्कृति-धर्म-दर्शन-अर्थशास्त्र-व्याकरण-काव्यशास्त्र-आयुर्वेदादि-विषयेषु यथा विपुलं प्राचीनं वाङ्मयमुपलभ्यते न तावदन्यत्र कस्यामपि भाषायाम् ।

मानवजातिविकासाध्ययनार्थं मूलस्त्रोतस्त्वेन भारतीयं वाङ्मयं गुरुतरम् । धर्मदर्शनयोः क्षेत्रे संस्कृतस्य उत्कर्षः सर्वातिशायी । अध्यात्मशास्त्रानुशीलनाय, काव्यतत्त्वज्ञानाय, नीतितत्त्वावबोधाय, आचारशिक्षासंग्रहाय, प्राचीनविधानज्ञानाय, गणित-ज्योतिष-अर्थशास्त्र-कामशास्त्र-सङ्गीतनृत्याभिनयादिकलानां सूक्ष्मातिसूक्ष्मज्ञानाय संस्कृतवाङ्मयमेवैकं शरणम् । विश्वप्रेम-विश्वबन्धुत्व-विश्वसंस्कृत्यादीनाम् आधारतत्त्वज्ञानार्थं संस्कृतस्यावदानम् न केनापि तिरोहितम् ।गीर्वाणगिरो माधुर्यं कस्य न सचेतसश्चेत आवर्जयति । कालिदास-माघ-श्रीहर्ष-जयदेवादीनां काव्यानि प्रतिपदं माधुर्योपेतानि, सङ्गीतात्मकानि, लालित्यवन्ति च सन्ति । देववाण्या माधुर्यगुणमुग्धा एव सरविलियमजोंसगेटे प्रभृतयः पाश्चात्त्या विपश्चितोऽपि तद्गुणानुवादपरा अभूवन् । 'मेघे माघे गतं वयः''मधुरकोमलकान्तपदावलीं श्रृणु तदा जयदेवसरस्वतीम्'[3] इत्यादय आभाणकाः कालिदासमाघजयदेवादीनां पदमाधुर्यं मनोज्ञत्वं सहृदयास्वाद्यत्वं च पुष्णन्ति । भारते तु न केवलं विज्ञापुरुषा एवापितु रसास्वादप्रवणा ललना अपि संस्कृताध्ययनं व्यदधुः । आकर्ण्यते यद् मण्डनपण्डितभवनविषये पृष्टा नार्यः तमेवमूचुः –

स्वतः प्रमाणं परतः प्रमाणं कीराङ्गना यत्र गिरो गिरन्ति ।
द्वारस्थनीडान्तरसन्निविष्टा जानीहि तन्मण्डनपण्डितौकः ।।

संस्कृतभाषैव अध्यात्मज्योतिःप्रदा, आचारशास्त्रशिक्षिका, सामाजिकसद्भावनाया मूला, जीवनोन्नतिकारिणी, ज्ञानाग्निना मोहान्धतमोविनाशिका, सत्पथप्रदर्शिका काचिदनुत्तमा शक्तिः । अध्यात्मदृशा तत्त्वार्थदीपिका, व्यवहारदृशा च वृत्तिसाहाय्यमाचरन्ती कर्तव्योद्बोधन-परा ।भारतस्य तु भाषैषा सांस्कृतिको निधिः। निखिलमपि सांस्कृतिकं वाङ्मयं संस्कृतमाश्रित्यैवावतिष्ठते। विश्वसंस्कृतिपरिज्ञानार्थमपि संस्कृतभाषा अपरिहार्या । तुलनात्मकसंस्कृतिविचारे संस्कृतभाषैव साहाय्यमाचरति । संस्कृतभाषाश्रयैव संस्कृतिः सुदूरपूर्ववर्तिषु ब्रह्मदेश-श्याम-यव-सुमात्रादि-द्वीपेषु प्रचचार । अमेरिका-यूरोपदेशस्थ-संस्कृतिष्वपि एतस्या अक्षयः प्रभावः परिलक्ष्यते । धर्मार्थिकाममोक्षात्मकपुरुषार्थचतुष्टयस्य साधनं संस्कृतवाङ्मयमेव । प्रागैतिहासिकतत्त्वावबोधाय संस्कृतमेवैकं शरणम् । भारोपीयसंस्कृतेः प्राचीनतमरूपावगमाय संस्कृतं विहाय नान्या गतिः । संस्कृतावाङ्मयाश्रयेणैव पाश्चात्त्यपौरस्त्यसंस्कृत्योः समन्वयः, सम्पर्कः, सङ्गतिश्चावगम्यते ।भारतीयसंस्कृतेः विशुद्धरूपज्ञानाय संस्कृतवाङ्मयमेवैकं साधनम् । जैनबौद्धचार्वाकादिसंस्कृतयोऽपि संस्कृतभाषाश्रया एव ।भारतस्य सामाजिकसद्भावना, सर्वाङ्गीणा समुन्नतिः, सर्वसुखदो विकासश्च संस्कृते एव सन्निहिताः सन्ति । वैदिकसाहित्याद् उद्भूता सेयं संस्कृतभाषापरम्परा अद्यावधि जीवतितमाम् । अद्यत्वेऽपि संस्कृतसाहित्यं, काव्यानि, नाटकानि, गीतिकाव्यानि, गद्यसाहित्यम्, विविधाः पत्रपत्रिकाश्च प्रतिसंवत्सरं प्रकाश्यन्ते, सहस्रशो लक्षशश्च तेषामध्येतारो दरीदृश्यन्ते । अक्षयोऽयं निधिः सर्वथा सर्वदा च अध्येयोऽनुशीलनीयः, सम्मान्यो विकासनीयश्च । उक्तञ्च –

सुवर्णा सद्वृत्ता विविधललितालङ्कृतिचणा,गुणाढ्या निर्दोषा विबुंधनिवहाराधितपदा ।

सुरीतिप्रख्याता भवविभवरुपाश्रितरसा,सदेयं शर्वाणी जयतु सुरवाणीह सततम् ।।

'सर्वभूतेषु चात्मानम्''आत्मवत् सर्वभूतेषु' इत्यादीनि वाक्यानि भारतीयानां विश्वजनीनं दृष्टिकोणं उदारतां च उद्घोषयन्ति । अनेनैव भारते विविधतायामपि सांस्कृतिकी एकता वर्तते । उदारतयैव सहिष्णुतायाः सामाजिकसद्भावनाया अहिंसायाश्च तत्त्वं भारतीयसंस्कृतौ समाविष्टम् । 'सन्तोष एव पुरुषस्य परं निधानम्' इत्येव भारतीयानां मान्यता । वस्तुतस्तु नैमान् विना जीवनं सुखशान्तिपूर्णं स्यात् ।

सामाजिकसद्भावनयासह संस्कृतिसंरक्षणेऽपि पर्याप्तं साहाय्यं एतेन प्रदत्तम् । एतादृशां सरस्वतीसेवकानां परिश्रमस्यैवेदं फलं यद् अस्माकंसंस्कृतिरद्याप्यक्षुण्णा । 'सुगा ऋतस्य पथाः'[4] 'सत्यस्य नावः सुकृतमपीपरत्[5] 'न ऋते श्रान्तस्य सख्याय देवाः [6] 'शतहस्तः समाहार सहस्रहस्तः संकिर'[7] 'एकं सद्विप्रा बहुधा वदन्ति',जीवमात्रे एकस्यैव

चैतन्यस्य सञ्चारो भवति । प्राणिमात्रेण परस्परं सुसम्पृक्तेन भवितव्यम् । अस्या भावनायाः प्रेरकस्य अथर्ववेदस्य ऋषेर्वाक्यमिदं वर्तमानकालिकमनुष्येभ्य आदर्शवाक्यमस्ति –सहृदयं सौमनस्यमविद्वेषं कृणोमि वः ।[8]अन्योन्यमभिनववत्सं जातमिवाघ्न्याः ।। **'न रत्नमन्विष्यति मृग्यते हि तत्** ।'[9] गुणग्राहकैः स्वयमेव गुणिनः अन्विष्यन्ते । यदा संसारस्य अन्ये देशाः असभ्याचरणं कुर्वन्ति तदा सभ्यतायाः उच्चशिखरारूढमस्माकं संस्कृतं वैदेशिकेम्योऽपि शिक्षां ददाति स्म । यथोक्तम्- एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।स्वंस्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः ।।[10]

संस्कृतेन संस्कृतस्यावदानेन सर्वा अपि विषमताः, सर्वोऽपि असन्तोषः ,सर्वाप्यशान्तिः, सर्वाण्यपि दुःखानि, सर्वापि दुरवस्था, सामाजिकसद्भावनाबलेन क्रमशः समतासन्तोषशान्तिसुव्यवस्थासु परिणताः भविष्यन्ति । एतादृशं संस्कृतं यस्मिन् देशे समाजे च विद्यते तस्मिन्देशे न किमपि वैषम्यं, न कापि कटुता भवति, अपि तु सर्वेषामपिसमृद्धिसुखशान्तिस्नेहादीनां बाहुल्यं भवति । सामाजिकसद्भावनायां संस्कृतस्यावदानेन सर्वेऽपि देशसेविनः, देशभक्ताः, राष्ट्रभक्ताश्च भविष्यन्तीति प्रत्येमि।

सन्दर्भसङ्केतः –

1. कपिलस्य
2. वाल्मीकि रा. सुन्दरकाण्डम् 30.17
3. गीतगोविन्दम् 1.3
4. ऋग्वेदः 8/3/13
5. ऋग्वेदः 9/73/01
6. ऋग्वेदः 4/33/11
7. अथर्ववेदः 3/24/4
8. अथर्वपिप्पलादः 5/19/01
9. कुमारसम्भवस्य पञ्चमे सर्गे
10. मनुस्मृतिः

स्नातकोत्तर धर्मशास्त्रविभागाध्यक्षः
कामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालयः,
कामेश्वरनगरम्, दरभंगा (बिहारः)

वर्तुलाकाराया धरायाः समत्वदर्शने सैद्धान्तिकं चिन्तनम्

✍प्रो.हंसधरझाः

धरेयं वर्तुलाकारेति नाविदितं विज्ञैः। नैव भूरेव किन्तु समग्रं ब्रह्माण्डमेव वर्तुलाकारम्। यथोपदिशति भगवान् सूर्यांशपुरुषः मयासुरं प्रति-

ब्रह्माण्डमेतत् सुषिरं तत्रेदं भूर्भुवादिकम्।
कटाहद्वितस्येव सम्पुटं गोलकाकृतिः।। इत्यादि।

पुनश्च सूर्यसिद्धान्ते भुवः स्थितिवर्णनप्रसंगे भगवान् सूर्यांशपुरुषः भुवं भूगोलशब्देनैवाख्यातम्। यथा[1]-

मध्ये समन्तादण्डस्य भूगोलो व्योम्नि तिष्ठति।
विभ्राणः परमां शक्तिं ब्रह्मणो धारणात्मिकाम्।। इति।

पुनरपि तत्रैव[2]-

भूगोलमध्यगो मेरुरुभयत्र विनिर्गतः।। इति।

इदमेव कारणं यद् भूरियं लोके भूगोलेतिनाम्नापि प्रथितमस्ति। अतो नास्त्यत्र सन्देहावसरो यद्धरेयं वर्तुलाकारा गोलकाकृतिर्वेति।तत्र हि गोलकाकृतिरियं धरा लोकैः कथं समतला दृश्यत इति स्वाभाविकः प्रश्नः।

तत्र नाविदितं सैद्धान्तिकैर्गणितज्ञैर्वा यत् कस्यापि वृत्तस्य षण्णवत्यंशो भागो न हि वृत्ताकारो किन्तु दण्डाकारो दृश्यते। यथोक्तमपि शाकल्यमुनिना[3]- "वृत्तस्य षण्णवत्यंशो$\frac{1}{96}$ दण्डवद्दृश्यते तु सः" इति। भुवः परिणाहः अत्यन्तं महान्। किन्तु पृथिव्याः परिणाहापेक्षया नरो नितरां लघुकायः। तत्र लघुकायत्वात् मानवः पृथिव्या अत्यल्पं भागमेव द्रष्टुं समर्थः भवति । यथोक्तमपि सूर्यांशपुरुषेण-

अल्पकायतया लोकाः स्वस्थानात् सर्वतोमुखम्।
पश्यन्ति वृत्तामप्येनां चक्राकारां वसुन्धराम्।।

आशयः स्पष्टो विद्यते, भूपृष्ठनिवासिजनाः अतिलघुशरीरतया स्वस्थानात् चतुर्दिक्षु गोलाकारामपि वसुन्धरां दर्पणोदरवत् समतलां पश्यन्ति। तत्र कारणं स्पष्टं यत् उपर्युक्तशाकल्योक्तवचनात् भुवः शतांशादल्पे दृश्यभागे वक्रतासम्भवो न भवतीतिहेतोः नरः गोलाकारामपि वसुन्धरां चक्रवत्(समतलां) पश्यन्तीति युक्तमेव। अत्र भास्करवचनमपि तथैव द्रष्टुं शक्यते[4]-

समो यतः स्यात् परिधेः शतांशः पृथ्वी पृथ्वी नितरां तनीयान्।
नरश्च, तत्पृष्ठगतस्य कृत्स्ना समेव तस्य प्रतिभात्यतः सा।। इति।

वस्तुतोऽत्र भुवः शतांशः शतांशाल्पो वाऽवलोक्यत इत्यत्र किं प्रमाणम् ? किं वाऽर्षवचनमेव प्रमाणम् उत वा गाणितिकं प्रमाणम् ? तदत्रोपस्थाप्यते प्रतीत्यर्थं गाणितिकप्रमाणरूपेण दृश्यभूभागगणितमेव। यथा-

---

[1]सूर्यसिद्धान्तः 12/32

[2]सूर्यसिद्धान्तः 12/34

[3]सूर्यसिद्धान्तः 2/15, श्रीतत्त्वामृतभाष्ये।

[4]सिद्धान्तशिरोमणिः, गोलाध्यायः, भुवनकोशः, श्लो. 13



अत्र भूपृष्ठगतस्य दृष्टिस्थानाद् भूबिम्बस्य समन्तात् स्पर्शरेखान्तर्गतः भूभागः दृश्यभागः, तन्मानज्ञानार्थं प्रयासः।

क्षेत्रे 'प' भूपृष्ठोपरि स्थितनरस्योच्छ्रितिः= पदृ = 4 हस्ताः। 'दृ' दृष्टिस्थानाद् भूबिम्बस्य कृता स्पर्शरेखा स्प बिन्दौ लग्ना। तेन दृस्प = स्पर्शरेखा। केस्प = भूव्यासार्धम्। अथ केदृस्प = जात्यत्रिभुजम्। यतः दृस्पके कोणः = 90^0 (रे.ग. अ.3, प्र.17) तेन $\sqrt{\text{केदृ}^2 - \text{केस्प}^2}$= दृस्प भवितुमर्हति। परञ्च केदृ = केप+पदृ =भूव्या$\frac{1}{2}$+ दृगुच्छ्रितिः। तथा केस्प = भूव्यासार्धम्। दृगुच्छ्रितिः = 4 हस्ताः।

अथ **"योजनानि शतान्यष्टौ भूकर्णो द्विगुणानि"** इति[5] सूर्यसिद्धान्तवचनात् भूव्या$\frac{1}{2}$= 800 योजनानि। एकस्मिन् योजने चत्वारः क्रोशाः। प्रतिक्रोशं सहस्रद्वयदण्डाः। प्रतिदण्डं च चत्वारो हस्ताः। अतो भूव्यासार्धहस्ताः = 800 × 4 × 2000 × 4 = 25,60,00,00 भवन्ति।

यतो हि, केदृ =भूव्या$\frac{1}{2}$+ दृगुच्छ्रितिः = 25,60,00,00 + 4 = 25,60,00,04 हस्ताः।

तथा, केस्प = 25,60,00,00 हस्ताः।

अतः, दृस्प =$\sqrt{\text{केदृ}^2 - \text{केस्प}^2}$=$\sqrt{(25,60,00,04)^2 - (25,60,00,00)^2}$=$\sqrt{204800016}$ स्वल्पान्तरात् 14311 लभ्यते। अर्थात् दृस्प = 14311 हस्ताः सिद्धाः।

अथ एतस्य चापात्मकज्ञानार्थं 'केदृस्प' त्रिभुजे यदि 25600004 हस्तमितया 'केदृ' कर्णरेखया तत्सम्मुखकोणज्या (ज्याLकेस्पदृ) त्रिज्या 3438 लभ्यते दृस्प भुजरेखया 14311 हस्तमितया

[5]सूर्यसिद्धान्तः, म.अ.श्लो.59

किमिति अनुपातेन तत्सम्मुखकोणज्या (ज्याLदृकेस्प) =$\frac{\text{त्रि}\times\text{दृस्प}}{\text{केदृ}} = \frac{3438\times14311}{25600004} = 2^{\text{।}}$ स्वल्पान्तरात्। एतच्चापं 'स्पप' तुल्यम्। तत्परमाल्पत्वात् 2। तुल्मेव।

पुनरस्य योजनात्मकमानज्ञानार्थमनुपातः। यदि चक्रकलाभिः भूपरिणाहयोजनानि लभ्यन्ते तदा भुवो दृश्यभागकलाभिः किमिति फलं भुवो दृश्यभागयोजनमितिः =$\frac{\text{केप}\times2}{21600} = \frac{\text{भूप}}{10800}$।एतेन भूपृष्ठगतनरस्य भूदृश्यभागमानं भूपरिधेः अयुतांशतोऽपि अल्पं सिद्ध्यति, अतः "वृत्तस्य षण्णवत्यंशो$\frac{1}{96}$ दण्डवत् परिदृश्यते " इति शाकल्यवचनानुसारं गणितागतो भूदृश्यभागः 'पस्प' नितरां सरलाकारो भवेत्। अतः 'प' स्वस्थानात् 'पस्प' सरलरेखारूपव्यासार्धेनोत्पन्नं वृत्तं दृश्यक्षितिजं सरलाकारं भवेदिति किं चित्रम्।।

।। इति शम् ।।

सन्दर्भग्रन्थाः-

1.सिद्धान्ततत्त्वविवेकः
2शिष्यधीवृद्धितन्त्रम्
3ब्राम्हस्फूटसिद्धान्तः
4सरलत्रिकोणमितिः
5रेखागणितम्(एकादशाध्याय)
6 सूर्यसिद्धान्तः (विज्ञानभाष्य)
7सूर्यसिद्धान्तः (श्रीतत्त्वामृतभाष्यम्)
8सिद्धान्तशिरोमणिः
9लीलावती
10गोलपरिभाषा

लेखकसङ्केतः-
राष्ट्रियसंस्कृतसंस्थानम्(मानितविश्वविद्यालयः)
भोपालपरिसरः, भोपालम्, मध्यप्रदेशः।।

वेदेषु ग्रहणविमर्शः

✍डॉ. अशोकथपलियालः

प्राचीनकालादेव मानवः आकाशनिरीक्षणं प्रति समुत्सुको दृश्यते। वैदिक-ऋषिभिरपि कौतूहलेन आकाशीयग्रह- तारकाणां गतिस्थितिविषये अध्ययनमारब्धम्। खगोले ग्रहनक्षत्राणां दैनन्दिनं दर्शनातिरिक्तमपि केचन आश्चर्योत्पादकाः चमत्काराः यदा कदा दृश्यन्ते । तेषु धूमकेतूल्कापातादय अनेका आश्चर्यजनकघटनाः न केवलं विस्मयोत्पादकाः अपितु अबोधजनानां मनसि भयमप्युत्पादयन्ति। अस्माकमृषयः आचार्याश्च ग्रहनक्षत्रादीनामध्ययनेन सह तासामपि सततं वेधं कृतवन्तः। प्राचीनभारतीयवाङ्मये अनेकेषु स्थलेषूल्कापातधूमकेत्वादीनां वर्णनमस्य प्रमाणम्। तासु खगोलीयाश्चर्यजनकघटनासु ग्रहणमन्यतमम्। कस्यापि खगोलपिण्डस्य दर्शने अपरखगोल- पदार्थेन कृतं व्यवधानमेव ग्रहणम्। पृथिवीतः दृश्यमानं ग्रहणं तु द्विविधम् - सूर्यग्रहणं चन्द्रग्रहणं चेति। सूर्यस्य दर्शने चन्द्रकृतव्यवधानं सूर्यग्रहणम्। यदा च चन्द्रस्य दर्शने भूच्छाया बाधामुत्पादयति तदा तु चन्द्रग्रहणमिति स्पष्टमेव। वैदिककाले ग्रहणस्य ज्ञानमुन्नतावस्थायामासीत्। वेदेषु ज्योतिषशास्त्रस्य बीजमेव लभ्यते न तु तस्य व्याख्यानम्। अतः ग्रहणविषयेऽपि यद्यपि तत्र सूक्ष्मदृष्टिः न प्राप्यते परन्तु यज्ञधर्मदर्शनादिविषयाणां विवेचनसमये प्रसङ्गवशादेव ग्रहणस्य यत्किंचिदपि वर्णनमुपलभ्यते तत्सर्वं तज्ज्ञत्वस्य प्रमाणम्। सूर्यग्रहणं त्वमावस्यायां तथा च चन्द्रग्रहणं पौर्णमास्यां भवतीति वैदिक-ऋषिभिः परिज्ञातमेवासीत्। अमावस्यायां सूर्याचन्द्रौ एकस्मिन्नेव राश्यादिके स्थितौ भवत इति ज्ञात्वा तत्र भणितमस्ति-**चन्द्रमा अमावस्यायामादित्यमनुप्रविशति..... आदित्याद्वै चन्द्रमा जायते।।**[1]अतः सूर्यग्रहणस्य कारकेषु चन्द्रोऽपि महत्त्वपूर्णमस्तीति सम्भवतः तदा ज्ञातमासीत्। ऋग्वेदेसूर्यग्रहणस्य विषये किंचिद्विशिष्टवर्णनं समुपलभ्यते।यथा **-यत्त्वा सूर्य स्वर्भानुस्तमसाविध्यदासुरः।अक्षेत्रविद्यथामुग्धो भुवनान्यदीधयुः।।स्वर्भानोरध यदिन्द्र माया अवो दिवो वर्त्तमाना अवाहन्।गूळहं सूर्यं तमसापव्रतेन तुरीयेण ब्रह्मणाऽविन्ददत्रिः।।मा मामिमं तव सन्तमत्र इरस्या द्रुग्धो भियसा नि गारीत्।त्वं मित्रो असि सत्यराधास्तौ मेहावतं वरुणश्च राजा।।ग्राव्णो ब्रह्मा युयुजानः सपर्यन् कीरिणा देवान्नमसोपशिक्षन्।अत्रिः सूर्यस्य दिवि चक्षुराधात्स्वर्भानोरप माया अघुक्षत्।।यं वै सूर्यं स्वभानुस्तमसाविध्यदासुरः।अत्रयस्तमन्वविन्दन्नह्यन्ये अशक्नुवन्।।**[2]उपर्युक्तमंत्रस्यानुशीलनेन निम्नबिन्दवः समुत्पद्यन्ते-

1. अत्र स्वर्भानुः सूर्यं तमसा आच्छादितवान् अर्थात् राहुः सूर्यग्रहणस्य कारक इति वर्णितमस्ति। अनेन स्पष्टं यत् राहुकृतग्रहणस्य कल्पना वैदिककालादेव दृश्यते । कल्पनेयं लाक्षणिकरूपा। वस्तुतः यदा क्रान्तिवृत्तचन्द्रविमण्डलयोः सम्पातयोरासन्नप्रदेशे (राहुकेतुसंज्ञकपातयोः सन्निकटः) सूर्याचन्द्रौ भूमण्डलेन दृश्येते तदैव ग्रहणस्य सम्भावना भवति। 'स्वर्भानु तमसा विध्यदासुरः' इत्यनेन स्वर्भानोस्तमसश्च पार्थक्यमपि सिध्यति। यद्यपि ज्योतिषशास्त्रस्य जातकग्रन्थेषु प्रायः राहुकृत एव तमश्शब्दस्य प्रयोगः दृश्यते।

2. उपर्युक्तमंत्रे खग्राससूर्यग्रहणस्य वर्णनं प्रतीयते। यतः खग्रासग्रहणे एव जनाः स्वस्थानं विस्मृत्य मुग्धाः स्तब्धाश्च भवितुं शक्नुवन्ति। तदा अकस्मात् दिवसकाले एव निशासदृशः अन्धकारः लभ्यते। इदं खग्रासग्रहणमत्यल्पं यदा कदा एव च भवति। परन्त्वत्र वर्णितं खग्रासग्रहणमत्यन्तं भीतिदर्शकं

विस्मयोत्पादकं वा नास्ति। अनेन अनुमीयते यत्तस्मिन्काले जनाः ग्रहणविषये पूर्वपरिचिता आसन्। शंकरबालकृष्णदीक्षितप्रभृतयः[3] विद्वांसः तथैवामनन्तीति।

3. इन्द्र! त्वं स्वर्भानोः मायायाः ध्वंसकः इति वर्णनेनानुमीयते यत् तदा ग्रहणकालविषये इन्द्रोऽपि किंचिज्ज्ञानं अवश्यमेव धारयति स्म परन्तु तुरीयब्रह्मणा अत्रिः तमाच्छादितं सूर्यं प्राप्तवानिति वर्णनेन स्पष्टं यत् केवलं अत्रिकृतग्रहणस्य स्पर्शमोक्षादिकालस्योद्घोषणा एव सफला जाता। सम्भवतः इन्द्रः अत्रेः ग्रहणकालानयने सहायतामकरोत् परन्तु ग्रहणगणिते अत्रेः एव वैदुष्यं, तस्य ग्रहणगणितस्य दृगैक्यता च सिध्यति। मन्त्रस्यान्तिमेऽपि कथितं यत् अत्रयस्तम् अवविन्दन् इह अन्ये अशक्नुवन् अर्थात् अत्रीणामतिरिक्तं अन्यः कश्चन स्पर्शादिकालानयने समर्थः नाभवत्। अत्रय इति बहुवचनप्रयोगेण अत्रिकुलोत्पन्नानां विदुषाम् अत्रिशिष्याणां चाभिप्रायः दृश्यते। सम्भवतः तदा अत्रिगुरुकुलस्य ज्योतिर्गणितविषये प्रसिद्धिरासीत्।

4. तत्रात्रिगुरुकुले ग्रहगणितस्य दृगैक्यता ज्ञानार्थं वेधशालायां यन्त्रादीनां प्रयोगः भवति स्मेति सम्भावना प्रबला अस्ति यतः तुरीयब्रह्म शब्दस्यात्र प्रयोगः दृश्यते। शब्दस्यास्य प्रथमोऽभिप्रायः यत् समाध्यवस्थायां अत्रिणा 'यत्पिण्डे तद्ब्रह्माण्डे' इत्यनुसारं ग्रहणकालादिज्ञानं प्राप्तम् । अपरोऽभिप्रायो यत् तुरीययन्त्रेण अत्रिणा ग्रहणकालादिज्ञानं कृतम्। ज्योतिषशास्त्रेऽपि तुरीययन्त्रस्य प्रयोगो भवति। अनेन ग्रहस्य नतांशादीनां साधनं क्रियते। उभौ आशयौ समीचीनौ दृश्येते परन्तु द्वितीयाशयस्य सम्भावनाधिका यतः अत्रिः सूर्यस्य दिवि चक्षुराधात्स्वर्भानोरपमाया अधुक्षत् अर्थात् आकाशे सूर्यस्य प्रकाशस्थाने अत्रिः चक्षुं स्थापयित्वा स्वर्भानोः मायाम् अघुक्षत् इत्यनेन वेधप्रक्रियायाः वर्णनं परिलक्ष्यते। **ग्राव्णो ब्रह्मा युयुजानः** इत्यत्र प्रस्तरवेधशालायाः योजना सम्भाव्यते। प्रसंगेऽस्मिन् दाहालमहोदयस्य विचारोऽस्ति यत्- "अत्र हि सूर्यस्य राहुणाऽऽच्छादनमुक्तम्। तस्य चात्रिणा प्रकाशनं जनेषु। चन्द्रमा हि अत्रेर्नेत्रसमुत्थत्वेन स्मर्यते 'अथ नयनसमुत्थं ज्योतिरत्रेरिव द्यौः' इत्यादौ। तेन हि 'अत्रिः सूर्यस्य दिवि चक्षुरागात् स्वर्भानोरपमाया अधुक्षत्' इति कथनेन चन्द्रपातस्य द्वितीयस्य संकेतोऽत्र लभ्यते। पश्चाद्वर्तिशास्त्रेषु राहुकेतुशब्दो पर्यायत्वेन निर्विशेषमपि प्रयुक्तौ दृश्येते। अत्र हि खग्रास- सूर्यग्रहणस्य प्रसंगो दृश्यते यद्धि यदा कदैव घटते। सूर्यग्रहणं ह्यमावास्यायामेव भवति। ऐतरेय ब्राह्मणे हि अमावस्यायां चन्द्रः सूर्यं प्रविशतीत्युक्तमपि दृश्यते। तेन हि सूर्यग्रहणं हि चन्द्रमसा सह सम्बद्धं भवतीति तदाऽपि ज्ञातमासीत्"।[4]

5. अत्र कुत्रापि न वर्णितं यत् स्वर्भानुः अर्थात् राहुः सूर्यमग्रसदिति। यद्यपि इयं कल्पना वैदिककालादनन्तरं प्रबला जातेति।उपर्युक्तमन्त्रे स्वर्भानुरिति शब्दस्यार्थं चन्द्रं मत्वा पं0 रघुनन्दनशर्ममहोदयस्य मतमस्ति यदत्र मन्त्रस्यार्थः ' हे सूर्य ! त्वां चन्द्रः येनांधकारेण आवृतं करोति, तेन रेखागणितानभिज्ञजनाः मुग्धाः भवन्ति ' इति।[5] स्वर्भानुरिति शब्दस्यार्थः चन्द्रः मया कोषादिग्रन्थेषु कुत्रापि न प्राप्तः, प्रायः अस्याशयः राहुरेव तथापि यदत्र 'अक्षेत्रविद्' शब्दस्य रेखागणितानभिज्ञः इत्यर्थः गृहीतः तत्तु समीचीनं प्रतीयते यतः रेखागणितस्यापरं नाम क्षेत्रगणितमप्यस्ति। ज्योतिषशास्त्र एव रेखागणितस्य प्रयोगो भवति अतः अक्षेत्रविदिति शब्दस्यार्थः परोक्षरूपेण ज्योतिषशास्त्रानभिज्ञोऽपि भवितुमर्हति। अपि च ज्योतिर्विद् ग्रहणस्य कारणं, तस्य कालादिकं च पूर्वमेव जानाति। अतः ग्रहणं दृष्ट्वापि तस्य मनसि भयं

नोत्पद्यते। ऋषिरत्रिरस्य प्रत्यक्षमुदाहरणमस्ति।एवमेव ताण्ड्यब्राह्मणे पंचस्थलेषु[6] स्वर्भानुकृतसूर्यग्रहणस्य वर्णनं समुपलभ्यते। तेषु द्वयोः स्थलयोः कथितमस्ति यत् अत्रिः भासा अर्थात् स्वतेजसा स्वर्भानुकृतान्धकारस्य नाशं कृतवान्। देवा अन्धकारस्य नाशका इति शेषस्थलेषु वर्णितमस्ति। गोपथब्राह्मणे[7] स्वर्भानुना कृतं सूर्यग्रहणस्य वर्णनमस्ति, यस्यापनोदनं अत्रिणा कृतम्। शतपथब्राह्मणे[8] सूर्यग्रहणे सोमरुद्राभ्यां तमोऽपनोदनं निगदितमस्ति । सम्भवतः तदा सोमरुद्राभ्यां प्रतिपादिता ग्रहणानयनपद्धतिः दृगैक्यतां धारयति स्मेति। अथर्ववेदे ग्रहणकालिकबिम्बवर्णस्य वर्णनमनुमीयते। यथा-**उच्चा पतन्तमरुणं सुपर्णं मध्ये दिवस्तरणिं भ्राजमानम्।पश्याम त्वा सवितारं यमाहूरजसा ज्योतिर्यदविन्ददत्रिः।।** [9]अत्र सूर्यग्रहणकाले सूर्यबिम्बं रजसावृतं जातम्, यस्य पुनरात्रिः अत्रिणाऽभवदिति वर्णितं दृश्यते। अर्थात् ग्रहणे सूर्यबिम्बं कृष्णवर्णः। तथैव प्रत्यक्षोपलब्धिरपि। ताण्ड्यब्राह्मणे ग्रहणबिम्बस्य वर्णविषये निम्नाख्यानं प्राप्यते -**स्वर्भानुर्वा आसुर आदित्यन्तमसाविध्यत्तं देवा न व्यजानँस्तेऽत्रिमुपधावँस्तस्यात्रिर्भासा तमोपाहन्यत् प्रथममपाहन् सा कृष्णाविरभवद्यदद्वितीयं सा रजता यत्तृतीयं सा लोहिनी यया वर्णमभ्यतृणत्सा शुक्लासीत्।।** [10]

उपर्युक्तवर्णनं ग्रहणस्य कालज्ञाने देवानामसमर्थतां प्रदर्शयति । यदा ते अत्रेः पार्श्वे गत्वा प्रार्थितवन्तः तदा अत्रिः स्वभासा तमोपाहन्यदर्थात् स्वग्रहणगणितज्ञानेन मोक्षादिकाल- मुक्तवान् । सर्वप्रथमं अत्रिणा बिम्बस्य कृष्णवर्णं दूरीकृतम्। तदनन्तरं रजोयुक्तः, तत्पश्चाच्च लोहितः बिम्बवर्णः जातः। ग्रहणानन्तरं बिम्बवर्णः शुक्लोऽभवत्। वर्णनमिदं पूर्णचन्द्रग्रहणे चन्द्रबिम्बस्य वर्णानां सम्भाव्यते यतोहि चन्द्रग्रहणमध्यकाले अर्धाधिकग्रासे बिम्बः कृष्णवर्णः, अर्धाल्पग्रासे रजोयुक्तः अर्थात् धूम्रवर्णः, मोक्षकालतः प्राक् लोहितवर्णः, ग्रहणस्य मोक्षकाले च शुक्लवर्णो दृश्यते। अतः प्रथमं तेन ग्रहणमध्यकालसमाप्तिज्ञानं कृतम्। तदोन्मीलनकालस्य तत्पश्चाच्च मोक्षकालज्ञानं कृतमिति। वस्तुतः वर्णद्वयसंयोगेन अपरो वर्ण उत्पद्यते। चन्द्रग्रहणे ग्राह्यग्राहकयोरेककक्षत्वात् वर्णयोर्योगेन अपरः नूतनवर्णः दृश्यते। तत्र भूच्छाया कृष्णवर्णा चन्द्रश्च शुक्लवर्णः। यदार्धाधिकग्रासस्तदा चन्द्रबिम्बे शुक्लभागो न्यूनः कृष्णांशोऽधिकः। अतश्चन्द्रः कृष्णवर्णस्य परिलक्ष्यते। यदाल्पग्रासस्तदा कृष्णभागो न्यूनः श्वेतांशोऽधिकः। अतस्तदा कृष्णश्वेतवर्णयोः संयोगेन धूम्रवर्णो दृश्यते। मोक्षोन्मुखं चन्द्रबिम्बं सूर्यस्य कानिचन किरणानि स्पृशन्ति फलतः तस्मिन् काले बिम्बस्य वर्णः ईषद्रक्तत्वयुक्तः कृष्णः अर्थात् लोहितवर्णः दृश्यते। मोक्षादनन्तरं चन्द्रबिम्बं शुक्लतां धारयति। सूर्यसिद्धान्तेऽपि प्रायः एतादृशमेव वर्णनं लभ्यते।यथा चन्द्रग्रहणे चन्द्रबिम्बस्य वर्णः-**अर्धादूनं सधूम्रं स्यात् कृष्णमर्धाधिके भवेत्।विमुंचतः कृष्णताम्रं कपिलं सकलग्रहे।।**[11]परन्तु ऋचः पूर्वार्धे स्वर्भानुर्वा आसुर आदित्यन्तमसा- विध्यतदिति वर्णनमस्ति अर्थादत्र सूर्यग्रहणस्य चर्चा अस्तीति स्पष्टं संलक्ष्यते। ततः कथं पूर्वे चन्द्रग्रहणे चन्द्रबिम्बवर्णवर्णनस्य सम्भावना प्रकटीकृता। सत्यं, परन्तु सूर्यग्रहणे एतादृशी स्थितिः न भवति यतः तत्र ग्राह्यग्राहकौ विभिन्नकक्षौ भवतः। अतस्तद्वर्णयोः संयोगो न भवति । येन सूर्यग्रहणे सूर्यबिम्बं सदा कृष्णं भवति। यथोक्तं ग्रहलाघवे -**धूम्रः कृष्णः पिंगलोऽल्पार्धसर्वग्रस्तश्चन्द्रोऽर्कस्तु कृष्णः सदैव।।**[12]अपि च सम्भाव्यते यत् सूर्यग्रहणकालस्य पक्षानन्तरं यच्चन्द्रग्रहणं दृश्यमानमभवत्तस्यापि सहैव वर्णनमत्राभवत्। वेदेषु कुत्रचित् स्थलेषु देवाः ग्रहणान्धकारस्य नाशकाः कथिताः सन्ति। अत्र वर्णितं यत् ते देवा न व्यजानन्। तत्र देवशब्दस्याभिप्रायः सूर्यरश्मिरिति दीक्षितमहोदयस्य मतमस्ति।[13] सूर्यरश्मिश्चन्द्रमा गन्धर्वः[14]अर्थात् चन्द्रः

सूर्यकिरणैः प्रकाशितं भवति। यतः चन्द्रग्रहणकाले सूर्यकिरणैः चन्द्रः न प्राप्तः, अतः रात्रौ अप्रत्यक्षसूर्यं स्वर्भानुः तमसावृतमकरोदिति कल्पना सम्भवतः तदा जाता। भूच्छाया चन्द्रमाच्छादयतीति ज्ञानं सम्भवतः तदा नासीत्। वैदिकवाङ्मये स्पष्टरूपेण चन्द्रग्रहणस्य वर्णनं कुत्रापि न प्राप्यते। यदि वैदिकजनाः सूर्यग्रहणस्य विषये पर्याप्तज्ञानं धारयन्ति स्म तदा कथं सम्भाव्यते यत् ते चन्द्रग्रहणस्य विषये अनभिज्ञाः आसन्? वस्तुतः ग्रहणस्य कारणं तस्य स्पर्शमोक्षादिकालविषयेऽपि च वैदिककाले सुदृढं ज्ञानमासीत्। सूर्यं स्वर्भानुः तमसा विदध्यादर्थात् राहुः सूर्यग्रहणस्य कारक इति राहुकृत- ग्रहणस्य कल्पना वैदिककालादेव दृश्यते। 'स्वर्भानुः तमसा विध्यदासुरः' इत्यनेन स्वर्भानोस्तमसश्च पार्थक्यमपि सिध्यति। सम्भवतः तदा अत्रिकुलोत्पन्नानां विदुषाम् अत्रिशिष्याणां वा ग्रहणगणितं दृगैक्यतां धारयति स्म। ग्रहणकाले ग्रहबिम्बस्य वर्णकथनं ग्रहणस्य सूक्ष्माध्ययनस्य निरीक्षणस्य च परिचयं ददाति। यद्यपि वेदेषु ग्रहणविषये सूक्ष्मविवेचनं नोपलभ्यते तथापि तत्रोपलब्धोल्लेख एव तज्ज्ञत्वस्य प्रमाणभूतः। वैदिककाले ग्रहगणितज्ञस्य समाजे सुप्रतिष्ठाऽऽसीत्। अतएव "प्रज्ञानाय नक्षत्रदर्शम्[15]" "यादसे गणकम्[16]" इत्यादयः वेदेषूपलभ्यन्ते। वस्तुतः वेदेषु समस्तज्ञानविज्ञानस्य मूलत्त्वं प्राप्यते। अत एव वेदानां वेदत्वमिति।

पादटिप्पणी -

1. ऐ.ब्रा. 40/5
2. ऋ. सं. 5/40/5-9
3. भा.ज्यो.-दीक्षित (हि.अनु.) पृ.84-85
4. उद्धृतं भा. ज्यो. इति.-दाहालः पृ. 33, 34
5. वैदिक सम्पत्ति - पं रघुनन्दनशर्मा पृ0 330-331
6. ता. ब्रा., 6/6/8, 14/11/14,15 , 4/5/2 , 4/6/13 एवं 23/16/2
7. गो. ब्रा. 8/19
8. श. ब्रा. 5/3/22
9. अ.सं. 13/2/2/36
10. ता. ब्रा. 6/6/8
11. सूर्यसिद्धान्त छेद्यकाधिकार श्लोक 23
12. ग्रहलाघव सूर्यग्रहणाधिकारः श्लोक 6।
13. भा.ज्यो.-दीक्षित (हि.अनु.) पृ.85
14. तै.सं. 3/4/7/1
15. वा.सं. 30/10
16. तत्रैव 30/20

ज्योतिषव्याख्याता (असि0प्रो0)
रा. सं. सं.भोपालनगरम्, मध्यप्रदेशः

कारकविवेचनम्

✍डॉ. धनुर्धरझाः

क्रियान्वयित्वं कारकत्वमित्यर्थस्वीकरणे सति देवदत्तस्य पुत्रं पन्थानं पृच्छतीत्यत्र देवदत्तस्यापि कारकत्वं स्यात्। साक्षात्क्रियान्वयित्वमिति स्वीकरणे मातुः स्मरत्यत्र मातुरित्यस्यापि कारकत्वं स्यादतः क्रियानिष्पादकत्वं कारकत्वमिति लक्षणं स्वीकर्त्तव्यम्। अर्थात् क्रियोत्पादकत्वं कारकत्वमिति। यदेव क्रियोत्पत्तौ कारणं तदेव कारकम्। महाभाष्ये उक्तम् – "कारकमिति महती संज्ञा क्रियते .... तत्र महत्याः संज्ञायाः करणे एतत्प्रयोजनं यथान्वर्थसंज्ञा विज्ञायेत - करोतीति कारकम्।" कारकाणि हि स्वस्वव्यापारेणावान्तरक्रियाद्वारेण वा केनापि रूपेण प्रधानक्रियोत्पत्तौ सहायकानि कारकाणि वा भवन्ति। अतः सर्वेषामेव तेषां प्रधानक्रियायामन्वयः। यथा हि पचनक्रियायादृष्ट्या पाकानुकूलव्यापाराश्रयत्वेन देवदत्तः कर्ता क्रियोत्पादकः। तण्डुलकर्मणि विक्लित्याधाररूपव्यापारः स्थाल्यादौ तण्डुलाधाररूपव्यापारः। ते हि व्यापाराः पाकक्रियोत्पत्तौ कारणानि अतस्तेष्वस्ति कारकत्वम्। वाक्यपदीयेऽप्युक्तम् – **निष्पत्तिमात्रे कर्तृत्वं सर्वत्रैवास्ति कारके। व्यापारभेदापेक्षायां करणत्वादिसम्भवः।।**कारकाणि षड् भवन्ति। तद्यथा – **कर्ता कर्म च करणञ्च सम्प्रदानन्तथैव च। अपादानाधिकरणमित्याहुः कारकाणि षट्।।**

1. **कर्ता** – प्रकृतधात्वर्थव्यापाराश्रयत्वं कर्तृत्वम्। भगवान् पाणिनिः "स्वतंत्रः कर्ता[6]" क्रियायां स्वातंत्र्येण विवक्षितोऽर्थः कर्ता स्यादिति व्यवस्थां ददाति। यदि हि स्थालीनिष्ठव्यापारः प्रकृतपचिविवक्षितो भवति तदा स्थाल्याः स्वातंन्त्र्येण कर्तृसंज्ञा भवति, परन्तु यदि पचेर्देवदत्तादिव्यापारो विवक्षितो भवति तदा स्थाली पारतन्त्र्येणाधिकरणत्वं भजते देवदत्तस्तु कर्तृत्वं स्वातंत्र्येण। यथोक्तं महाभाष्ये – "एवं तर्हि स्थालीस्थे यत्ने कथ्यमाने स्थाली स्वतंत्रा कर्तृस्थे यत्ने कथ्यमाने परतन्त्रा[7]"। अत एवोक्तं स्वातन्त्र्यञ्च धात्वर्थव्यापाराश्रयत्वमिति। यस्य कस्यापि कारकस्य व्यापारस्य प्रस्तुतधातुवाच्यता तदेव कारकं कर्तेति। तेन 'स्थाली पचति' 'अग्निः पचति' 'एधांसि पचन्ति' 'तण्डुलः पच्यते स्वयमेव' इत्यादिप्रयोगाः सुसंगताः भवन्ति। 'देवदत्तः काष्ठैः स्थाल्यां तण्डुलं पचति' इत्यत्र पचिर्देवदत्तस्यैव यत्नरूपव्यापारं कथयति नान्येषामिति तस्यैव कर्तृत्वमत्र। यदि हि कथ्यते तण्डुलः पचते स्वयमेवेति तदा तण्डुलः कर्तृत्वं भजते, तस्यैव व्यापारस्य पचिवाच्यत्वात्। कर्तुर्हि पञ्चभेदाः दृश्यन्ते। तद्यथा – स्वतंत्रकर्ता, हेतुकर्ता, कर्मकर्ता, अभिहितकर्ता, अनभिहितकर्ता चेति।

2. **कर्म** – "कर्तुरीप्सिततमं कर्म[8]" इति सूत्रेण कर्तुः क्रियया आप्तुमिष्टतमं कारकं कर्मसंज्ञकं भवति। यथा – रामः ओदनं खादत्यत्रेप्सिततममोदनम्। अत एतस्य कर्मसंज्ञा। ननु सूत्रे कर्तुरिति कथम् ? 'क्रियया आप्तुमिष्टतमं कर्मसंज्ञं स्यात्' इत्येवोच्यताम् ? इति चेन्न 'माषेष्वश्वं बध्नाति' इत्यत्र माषपदस्यापि कर्मसंज्ञा स्यात्। अस्ति चात्र कर्मण ईप्सिता माषा नतु कर्तुः। तमब्ग्रहणाभावे च 'पयस्' शब्दादपि कर्मसंज्ञात्वेन द्वितीया स्यात्। तन्न भवतु। एतदर्थं तमब्ग्रहणं क्रियते । तथा हि पयसा ओदनं भुङ्क्ते इत्यस्य पयसा मिश्रमित्यर्थः सम्भवति। यद्यप्यत्रभोक्तुरोदन एव पयसा मिश्र उद्देश्यः, नतु केवलं पयः, नापि केवलं ओदनः। न ह्यसौ केवल पयःपानेन तुष्यति, नापि केवलौदनेन। तथापि यदा भुक्तवानेव पयोलिप्सया पुनः ओदनभोजने प्रवर्तते तदा इदं प्रत्युदाहरणम्। तत्र यद्यपि पय उद्देश्यं भुजिक्रियां प्रति, तथापि भुजिक्रियाकर्मीभूतमोदनं प्रति मिश्रणसाधनतया गुणत्वेनैव तदुद्देश्यम्, नतु भोज्यत्वेन। अतस्तत्र पयसो गुणत्वेन ओदनस्य तत्संस्कार्यतया उद्देश्यत्वात् ओदनस्यैव ईप्सिततमत्वम्, न तु पयसोऽपि। तस्मादोदन एव ईप्सिततमः, गुणेषु अस्य नानुरोध इति भावः। अत्रेदं तत्त्वम् – प्रयुक्तधातोर्यः प्रधानीभूतो व्यापारोऽर्थस्तेन साक्षात् परम्परया वा प्रस्तुतधात्वर्थरूपफलाश्रयत्वेनोद्देश्यविशेषयोग्यताशालित्वम् कर्म कथ्यते। यथा 'घटं करोति' इत्यत्र प्रस्तुतः कृधातुर्यस्य प्रधानोऽर्थ उत्पत्यनुकूलव्यापारो यत्प्रयोज्यकृधातुगौणीभूतार्थ उत्पत्तिरूपं फलम्। तदाश्रयत्वेनाभीष्टो घट इति घटस्य कर्मत्वम्। फलव्यापारौ हि धात्वर्थौ यत्र व्यापारस्य प्राधान्यं फलस्य गौणता च।

---

[6]पा.सू. 1.4.54

[7]पा.सू.1.4.23

[8]पा.सू.1.4.49

व्यापारो हि फलस्य जनकः सामान्यतः साक्षादेव क्वचित्तु परम्परयापि। जनकत्वञ्च न केवलमुत्पादकत्वमपितु प्रयोज्यत्वमपि। व्यापारस्य फलप्रयोज्यत्वेनैव गां दोग्धि पयः इत्यस्य कर्मत्वं सिध्यति तत्र धात्वर्थव्यापारस्य साक्षात्फलजनकत्वाभावात्।'प्रयागात् काशीं गच्छति' विभागस्य प्रकृतधात्वर्थाभावात् प्रयागस्य फलतावच्छेदक सम्बन्धेन पलाश्रयत्वेनोद्देश्यत्वाभावाच्चेति।कर्म हि सप्तविधम्। ईप्सतम्, अनीप्सितम्, ईप्सितानीप्सितम्, अकथितम्, कर्तृकर्म, अभिहितम्, अनभिहितं कर्म चेति।

3. **करणम्** – "साधकतमं करणम्[9]" सूत्रमिदं करणसंज्ञाविधायकम्। यथा – रामः वाणेन वालिं जघान। नन्वस्मिन् सूत्रे 'साधकम्' इत्येव उच्यताम्। यतः कारकाधिकारादिह कारकमिति वर्तते। साधकं कारकं हि पर्यायः, तथा चोभयोपादनेन प्रकर्षो लभ्यते। अतस्तमब् ग्रहणन्न स्यादिति चेन्न अस्मिन् कारकप्रकरणे गौणमुख्यन्यायः एतत्सूत्राद् अन्यत्र न प्रवर्तते इति ज्ञापनार्थं तमब् ग्रहणम्। अन्यथा "आधारोऽधिकरणम्[10]" इत्यत्र 'अधिकरणम्' इति अन्वर्थमहासंज्ञाबलादेव आधारलाभे पुनः तमब्ग्रहणसामर्थ्यात् सर्वावयवव्याप्या य आधारः सः अधिकरणमित्यर्थः स्यात्। एवं च 'तिलेषु तैलम्', 'दध्नि सर्पिः', इत्यादावेव अधिकरणसंज्ञा प्रवर्तेत 'गंगायां घोषः' 'कूपे गर्गकुलम्' इत्यादौ न स्यात् । अतः 'तमब्' ग्रहणम् कृतमिति भाष्ये निरूपितम्। तेन "साधकतमं करणम्" इति सूत्रे 'करणम्' इति महासंज्ञाबललभ्यार्थस्य अनाश्रयणात् 'साधक' पदं केवलसाधकस्यैव बोधकं नतु प्रकृष्टसाधकरूपार्थस्येति तदर्थलाभाय सूत्रे 'तमब्' ग्रहणस्य संनिवेशेन स्वांशे चरितार्थता। अयं भावः – यस्य हि स्वनिष्ठव्यापारव्यवधानेन क्रियायाः फलोत्पादकत्वं तत्कारकं हि करणम्। अयमेव "साधकतमं करणमि"ति सूत्रे साधकतमपदस्यार्थः। अत्र हि तमप्प्रत्ययः प्रकर्षबोधकः प्रकर्षत्वञ्च कारकस्य व्यवधानरहितत्वेन फलोत्पादकव्यापारयुक्तत्वमेव, तच्च कारकान्तरापेक्षया न तु स्वप्रकृतिककारकान्तरापेक्षया । यथा दण्डेन घटं करोति इत्यादौ दण्डनिष्ठव्यपारसमकालमेव घटरूपफलमुत्पद्यते इति दण्डस्य करणत्वम्। करणं द्विविधम् – वाह्यम् आभ्यन्तरञ्च।

4. **सम्प्रदानम्** – धात्वर्थभूतकर्मसम्बन्धार्थम् क्रियायामुद्देश्यभूतमर्थाद्यदुदिश्य कर्म क्रियते तत्कारकं सम्प्रदानं भवति । उद्देश्यकर्मणोः परस्परं स्वस्वामिभावज्ञेयज्ञातृभावादिसम्बन्धः। ब्राह्मणाय गां ददाति इत्यत्र दानक्रियायाः कर्म गौरुद्देश्यश्च ब्राह्मणस्तयोः सम्बन्धश्च स्वस्वामिभावाख्यः। चैत्रो मैत्राय वार्ताः कथयतीत्यादौ कथनक्रियायाः कर्म वार्ता उद्देश्यश्च मैत्रस्तयोः सम्बन्धश्च ज्ञेयज्ञातृभावाख्यः। तेन क्रियोद्देश्यत्वाद् ब्राह्मणमैत्रयोः सम्प्रदानत्वम्। "कर्मणा यमभिप्रैति स सम्प्रदानम्[11]" इत्यस्य विधायकं पाणिनीयं सूत्रम्। सम्प्रदानमिदंत्रिविधम् – प्रेरकमानुमन्त्रिकमनिराकतृकञ्चेति।

5. **अपादानम्** –अप = अपकृष्य = पृथक्कृत्य, आदीयते = गृह्यत इति अपादानम्। इत्यस्य विधायकंसूत्रं "ध्रुवमपायेऽपादानम्[12]" इति। अस्यार्थोऽयम् – अपायः = विश्लेषः, तस्मिन् साध्ये ध्रुवम् = अवधिभूतं कारकमपादानं स्यात्। अयं भावः – अपादानत्वं हि सम्बद्धकर्तरि समवायसम्बन्धेन स्थिता या क्रिया तज्जन्यो यः प्रस्तुतधात्वविषयविभागस्तदाश्रयत्वमेव। इदमेवाश्रयत्वमवधिः। यथा 'रामो गृहादागच्छति' इत्यत्र गृहस्य। अत्र हि कर्ता रामस्तेन सह समवायरूपेण सम्बद्धा आगमनक्रिया यतो हि विभाग उत्पद्यते। स च विभागो नहि आ + गम्धातुवाच्यः। तेन हि विभागाश्रयो गृहमतस्तत्रापादानत्वम् यत्र पञ्चमीविधानम्। विभागो हि न केवलं वास्तविकोऽपितु बुद्धिपरिकल्पितोऽपि। विभागस्य बुद्धिपरिकल्पितत्वादपि 'माथुराः पाटलिपुत्रकेभ्य आढ्यतराः' इत्यत्र पाटलिपुत्रकेऽपादानत्वम्। तेनैव 'चैत्रान्मैत्रः सुन्दरः' इत्यत्र चैत्रस्यापादन्त्वमपि। इदं हि द्विविधम् – चलमचलञ्चेति।

6. **अधिकरणम्** - "आधारोऽधिकरणम्[13]" इति ह्यस्य विधायकं पाणिनिसूत्रम्। कर्तृकर्मद्वारा तन्निष्ठक्रियाया आधारः कारकमधिकरणसंज्ञं स्यात्। अयं भावः – कर्तृद्वारेण व्यापाराधारवं कर्मद्वारेण फलाधारत्वं वाधिकरणत्वम्। न च 'आधारोऽधिकरणम्' इति आध्रियते क्रियाऽस्मिन्नित्याधार इति व्याख्यानेन साक्षात्क्रियाधारभूतयोः

[9]पा.सू.1.4.42

[10]पा.सू.1.4.45

[11]पा.सू. 1.4.32

[12]पा.सू. 1.4.24

[13]पा.सू.1.4.45

कर्तृकर्मणोरधिकरणत्वमिति वाच्यम्, तयोस्तु परशास्त्रत्वेन कर्तृकर्मसंज्ञाभ्यामधिकरणत्वबाधनात्। तेन च साक्षात्क्रियाधारयोः कर्तृकर्मणोरधिकरणत्वमपि तु तत्तद् द्वारेण फलव्यापाराधारयोरेव तत्। हरिरप्याह **"कर्तृकर्मव्यवहितामसाक्षाद्धारयत्क्रियाम्।उपकुर्वत्क्रियासिद्धौशास्त्रेऽधिकरणंस्मृतम्[14]।।"** कर्तृकर्मव्यवहितत्वेन क्रियाया असाक्षादाधाररूपेण तत्सिद्धावुपकारकं कारकमधिकरणमुच्यते इति तस्यार्थः। अधिकरणं हि त्रिविधमभिव्यापमौपश्लेषिकं वैषयिकञ्चेति। तत्र सम्पूर्णावयवव्याप्ते सति व्यापकाधारत्वम्। यथा तिलेषु तैलमिति। इदमेव मुख्यमधिकरणमेतदपेक्षाया इतरयोर्गौणत्वमेव । वर्गीकरणस्याधारः "संहितायाम्[15] " "तदस्मिन्नधिकमिति दशान्ताड्डः[16]" एतत्सूत्रद्वयभाष्यमेव। अभिव्यापकत्वं हि आधारस्य सम्पूर्णावयवे आधेयस्य सत्ताया व्याप्तिरेव। यथा दधनि सर्पिः। औपश्लेषिकं सामीप्येन सम्बन्ध एव । शब्दस्य शब्देन सम्बन्धोऽप्यौपश्लेषिक एव। "इको यणचि" इत्यत्र औपश्लेषिकमेवाधिकरणमिगादीनामजादिसामीप्यमस्याशयः। वैषयिकमिति विषयसम्बद्धम्। यत्राधेय आधारे समवायसम्बन्धेन तिष्ठति तदौपश्लेषिकं यत्र च तयोः सामीप्यसम्बन्धः संयोगसम्बन्धो वा तदौपश्लेषिकं तदुभयातिरिक्तं यत्राधेय आधारे विषयतासम्बन्धेन तिष्ठति तद्वैषयिकमधिकरणमिति। यथा कटे आस्ते। अन्ये तु कटे आस्ते इत्यत्र संयोगसम्बधेनौपश्लेषिकमेवाधिकरणं मन्यन्ते उदाहरन्ति च वैषयिकाधिकरणं मोक्षे इच्छास्तीत्यादौ । लघुशब्देन्दुशेखरेऽप्युक्तम् – कटे आस्ते इति तु नापश्लेषिकोदाहरणं युक्तमुक्तभाष्यविरोधात्। यद्वा एकदेशावच्छेदेन श्लेषेऽपि श्लेषस्थसमीपमुपश्लेषं तत्कृतमिति व्युत्पत्यौपश्लेषिकत्वमित्यभिप्रायेण तदुदाहरणमिति। सिद्धान्तमञ्जूषायमुक्तम् – तत्राधारस्त्रिधा – औपश्लेषिको, वैषयिकोऽभिव्यपकश्चेति। तत्र संयोगसमवायिसम्बन्धेन कर्तृकर्मसम्बन्ध आद्यः। विषयतासम्बन्धेन तत्सम्बद्धो द्वितीयः व्यापकसम्बन्धेन तृतीयः। तत्र कटे शेते इत्यत्र स्ववृत्तिकर्तृकत्वसम्बन्धेन कटवृत्तिशयनमिति बोधः, मोक्षे इच्छास्तीत्यत्र स्वविषयकर्तृकत्वसम्बन्धेन मोक्षवृत्तिरिच्छाकर्तृका सत्तेति बोधः। सर्वस्मिन्नात्मास्तीत्यत्र स्वव्यापककर्तृकत्वसम्बन्धेन सर्ववृत्तिरात्मकर्तृका सत्तेति बोधः। लघुमञ्जूषायां तु इत्थमुक्तम् – अधिकरणं त्रिधा, औपश्लेषिकं, वैषयिकमभिव्यापकञ्चेति। तदुक्तं हरिणा – **उपश्लेषस्य चाभेदस्तिलाकाशकटादिषु। उपकारात्तु भिद्यन्ते संयोगिसमवायिनाम्।अविनाशो गुरुत्वस्य प्रतिबन्धे स्वतन्त्रता। दिग्विशेषादवच्छेद इत्याद्या भेदहेतवः।।**इत्यौपश्लेषिकाभिव्यापकवैषयिकेषु त्रिष्वपि उपश्लेषोऽस्त्येव उपकारः सम्बन्धस्तद्भेदात्तु त्रित्वेन व्यवहारः। 'कटे आस्ते' इत्यादौ संयोगिन्याधारे कतिपयावयवव्यास्यैव सम्बन्धः। तिलेषु तैलमित्यादौ समवायिनि समस्तावयवव्यास्या खे शकुनय इत्यत्र । काशस्य तात्विकावयवाभावात्कल्पितदेशात् वैषयिकत्वं कल्पितदेशापेक्षया चात्राप्य युक्तान्तर उपश्लेषः।

लेखकसंकेतः-
राष्ट्रिय (श्रीवाणीयुवा-अलंकरण)सम्मानेनसम्मानितः
प्रशिक्षितस्नातकशिक्षकः
(हिन्दी, संस्कृतम्)
परमाणु-ऊर्जाकेन्द्रीयविद्यालयः- 1, जादूगोड़ा,
पूर्वीसिंहभूम, झारखण्ड,पिन-832102,

[14]वाक्यपदीयम् 3.7.148

[15]पा.सू.7.1.72

[16]पा.सू.5.2.45

पश्य मृगो धावतीत्यत्र शाब्दबोधोपपत्तिः

✍ मौनिका बोल्ला

शब्दायत्तं जगत् सर्वमिति जानीम एव शब्दब्रह्मवादिनो वयं शाब्दिकाः । स च शब्दः कीदृशः ? इति चेत् तत्र स्फोटात्मको शब्दो गृह्यते । यद्यप्ययं स्फोटः वर्णपदवाक्यभेदेन त्रिविधः । तत्रापि जातिव्यक्तिभेदेन षोढा , पुनः अखण्डपदस्फोटः अखण्डवाक्यस्फोटश्चेति सङ्कलनया अष्टविधः । तथापि लोके अर्थबोधकत्वात् , तेनैवार्थसमाप्तेश्च वाक्यस्फोट एव तेषु वास्तविकः, वर्णादिस्फोटास्त्ववास्तविका एव । ननु वाक्यस्फोटस्यैव मुख्यत्वे वर्णादिस्फोटानामुपादानं दोषग्रस्तं दुरर्थकं वा इति चत् तन्न , यतो हि देशकालकर्तृभेदाद्वाक्यानि अनन्तानि , अतस्तेषु सङ्केतग्राह्यशक्तिग्रहोऽसम्भवः, अतः आचार्याः लघूपायेन वाख्यान्वाख्यानं यथा स्यादिति विचार्य स्वप्रक्लृप्त्या वाक्ये पदानि , पदे च प्रकृतिप्रत्ययविभागञ्चक्रिरे । एवं प्रकृतिप्रत्ययसमूहः = सुबन्तं तिङ्गन्तं वा पदं भवति , तदाह भगवान् पाणिनिः 'सुप्तिङ्गन्तं पदम्' इति , गौतमश्च 'ते विभक्त्यन्ताः पादम्' (न्याय. सूत्र. 2/2/60) इति । ततः सुबन्तपदसमूहः, तिङ्गन्तपदसमूहः, सुबन्ततिङ्गन्तपदसमूहो वा वाक्यत्वेन ग्राह्यः । इत्येवं प्रक्लृप्तानां सुबन्ततिङ्गन्तपदार्थानां परस्पराकाँक्षायामन्वये सति वाक्यार्थबोधो जायते । तमेव वाक्यार्थबोधं 'शाब्दबोधः' इत्यपि वदन्ति । अथेदानीं मया पश्य मृगो धावति इत्यत्र शाब्दबोधसम्बन्धिविषयः कश्चिन्नस्मिन्निबन्धे निबिभन्स्यते । तत्र सर्वप्रथमम् –

1. कस्तावच्छाब्दबोधः ?

